[1]येऽत्र षष्ठीनिर्देशाः, सप्तमीनिर्देशाः, पञ्चमीनिर्देशाश्च, तेषां 'षष्ठी स्थानेयोगा' (१. १. ४९/३८), 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१. १. ६०/४०), 'तस्मादित्युत्तरस्य' (१. १. ६७/४१) इति[2] च कर्तव्ये नासिद्धत्वं भवति, 'कार्यकालं हि सञ्ज्ञापरिभाषम्' (व्या. प. ५८) इति पूर्वत्वमासां परिभाषाणां नास्ति इति। विप्रतिषेधे परम् (१.४.२/१७५) [3]इत्येषा च परिभाषा येन पूर्वेण लक्षणेन सह स्पर्धते, परं लक्षणं तत्प्रति तस्यासिद्धत्वान्न प्रवर्तते। तथा च विस्फोर्यम्, [4]अगोर्यम् इति गुणः परेण 'हलि च' (८.२. ७७/३५४) इति दीर्घत्वेन न बाध्यते। अपवादस्य [5]तु परस्यापि उत्सर्गे कर्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति। तेन [6]दोग्धा, दोग्धुम् इत्यत्र घत्वस्य असिद्धत्वाद् 'हो ढः' (८. २. ३१/३२४) इति [7]न भवति॥

## नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति। (२/३६३)

नलोपः पूर्वत्र असिद्धो भवति सुब्विधौ, स्वरविधौ, सञ्ज्ञाविधौ, तुग्विधौ च कृति। [8]विधिशब्दोऽयं प्रत्येकमभिसम्बध्यमानः [9]स्वरसञ्ज्ञातुकां विधेयत्वात् तैः [10]कर्मषष्ठीयुक्तैः भावसाधनोऽभिसम्बध्यते। सुपा तु सम्बन्ध[11]सामान्यवचनषष्ठ्यन्तेन [12]कर्मसाधनः। तेन सुपः स्थाने यो विधिः, सुपि च [13]परभूते, सर्वोऽसौ सुब्विधिः इति सर्वत्रासिद्धत्वं भवति। सुब्विधौ तावत् राजभिः, तक्षभिः इत्यत्र नलोपस्य असिद्धत्वात् 'अतो भिस ऐस्' (७. १. ९/२०३) इति न भवति। राजभ्याम्, तक्षभ्याम्, राजसु, तक्षसु इति 'सुपि च' (७.३. १०२/) इति, 'बहुवचने झल्येत्' (७. ३. १०३/२०५) इति [14]दीर्घत्वमेत्वं च न भवति।

स्वरविधौ – राजवती इत्यत्र नलोपस्य असिद्धत्वात् '[15]अन्तोऽवत्याः' (६. १.२२०/३७०६) इति[16] न भवति। [17]पञ्चार्मम्, दशार्मम्, इत्यत्र नलोपस्य असिद्धत्वात् 'अर्मे चावर्णं द्व्यच् त्र्यच्' (६. २. ९०/३८२४) इति [18]पूर्वपदस्य आद्युदात्तत्वं न भवति। पञ्चदण्डी इत्यत्र नलोपस्य असिद्धत्वाद् इगन्ते द्विगौ (६. २. २९/३७६३) इति पूर्वपदप्रकृतिस्वरो न भवति।

सञ्ज्ञाविधौ – पञ्च ब्राह्मण्यः, दश ब्राह्मण्यः इति नलोपस्य असिद्धत्वात् 'ष्णान्ता षट्' (१. १. २४/३६९) इति षट्सञ्ज्ञा भवति, ततश्च 'न षट्स्वस्रादिभ्यः' (४. १.१०/३०८) इति टापः प्रतिषेधो भवति। तदेतत् प्रयोजनं कथं भवति? यदि प्रतिकार्यं सञ्ज्ञाप्रवृत्तिः इत्येतद् दर्शनम्। या हि जश्शसोर्लुगर्था षट्सञ्ज्ञा प्रवृत्ता, [19]तया [20]स्त्रीप्रत्ययप्रतिषेधो न क्रियते इति सा पुनः प्रवर्तयितव्या [21]इति।

तुग्विधौ – वृत्रहभ्याम्, वृत्रहभिः [22]इति नलोपस्य असिद्धत्वात् 'ह्रस्वस्य पिति कृति तुक्' (६. १. ७१/२८५८) इति तुग् न भवति। अत्र केचित् 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या. प. १२) इति तुकं प्रति नलोपस्य [23]अनिमित्तत्वात्, बहिरङ्गलक्षणेन वा असिद्धत्वात्, तुग्विधिग्रहणमनर्थकम् इति प्रतिपन्नाः। तत् तु क्रियते परिभाषाद्वयस्य अनित्यत्वं ज्ञापयितुम्।

---

1. यत्र क. 2. परस्यापि इत्यधिकम् क. 3. इत्येव तु ब. 4. अवधार्यम् ब. 5. तु नास्ति ब. 6. दोग्धव्यम् क. 7. ढत्वम् इत्यधिकम् इ क. ह. 8. तत्र इत्यधिकम् क. 9. स्वरसंज्ञाविधौ इ. 10. कर्मणि षष्ठी क. 11. सामान्यवचनः ब. 12. कर्मसाधनेन क. 13 परभूतो यो विधिः इ. ह. 14. दीर्घत्वैत्वे न भवतः ब. 15. एतोवत्या ब. 16. उदात्तो इत्यधिकम् क. इ, स्वरो इत्यधिकम् ह. ड. 17. पञ्चानां दशाना– मित्यत्र ब. 18. पूर्ववत् इ. 19. तयोः ब. 20. स्त्रीप्रत्ययस्य ब. क. ह. 21. इति नास्ति ब. क. 22. इत्यत्र ब. 23. असिद्धत्वात् क. ह.